श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्) अनुगृहीता

# ॥ श्री श्रीनिवासाष्टोत्तरशतनामस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासाष्टोत्तरशतनामस्तुतिः ॥

श्रीनिवासो वासुदेवो लक्ष्मीशः पुरुषोत्तमः।
अचिन्त्यानन्तविभवो भावाभावविभावनः॥ 1 ॥

अहंभावात्मभावात्मा शान्तानन्तविभूतिकः।
परंब्रह्म व्यक्तभासः लीलालोलजगन्मयः॥ 2 ॥

सर्वाधारः कामदोग्धा सर्वशक्तो विमुक्तिदः।
आद्यन्तरहितो देवः सर्वकार्यैककारणः॥ 3 ॥

सर्वाङ्गसुन्दरः सर्वव्यापको भवतारकः।
हिरण्यवर्णो हैरण्यप्राकारो वेदगोचरः॥ 4 ॥

मनोज्ञेयो ज्ञानगम्यो नित्यमुक्तात्मसेवितः।
निर्विकल्पो महानन्दः महामायो महौषधिः॥ 5 ॥

शुभावहो नित्यतुष्टः परमात्मा जगन्निधिः।
विद्याप्रियः सुप्रसन्नः सर्वगन्धो मनोहरः॥ 6 ॥

सामप्रियः सर्वसेव्यः शुभरेखः चतुर्भुजः।
भक्तजुष्टो नित्यपुष्टः निरुपाधिः महाबलः॥ 7 ॥

अक्षोभ्यः सर्वतोभद्रः निर्भयः समदर्शनः।
स्तुतिप्रियः त्रिकालस्थः सर्वाकारो महोदयः॥ 8 ॥

भोगप्रियो दयाम्भोधिः शान्तिदो भक्तवत्सलः।
नारायणो दीर्घबन्धुः वक्षोलक्ष्मीविलासवान्॥ 9 ॥

सर्वदोषप्रशमनः सर्वाभीष्टप्रदायकः।
सर्वपापप्रशमनः सर्वसौभाग्यदायकः॥ **10** ॥

योगप्रियः योगिसेव्यः शरण्यो योगसिद्धिदः।
पुण्यावासः सत्यरतः हृदयस्थफलप्रदः॥ **11** ॥

देवश्रीशः वेदमेशः महाश्रीशो द्विजप्रियः।
ब्रह्मश्रीशः पुण्यरूपः योगीशः सात्विकप्रियः॥ **12** ॥

सीताकान्तः शमोपघ्नः रुक्माभः प्रियदर्शनः।
क्षेमदः सत्यभामेशः धरेशो यज्ञदक्षिणः॥ **13** ॥

विष्णुक्रान्तो रथक्रान्तः वाराहः सर्वसाक्षिकः।
सुदर्शनो यज्ञगर्भः साधुत्रो रत्नपादुकः॥ **14** ॥

दुस्स्वप्नदुष्फलहरः शुभाङ्गो वसुधाप्रियः।
श्रेयस्करो देवदेवः सुवीरो दुष्टमर्दनः॥ **15** ॥

भास्करो ज्ञानचक्रेशः स्वस्तिदः श्रेयसां निधिः।
पद्मावतीसहचरः भोगीन्द्रशयनप्रियः॥ **16** ॥

शान्तिप्रियो महाविष्णुः ज्ञानदः स्फूर्तिदायकः।
सर्वलक्षणलक्षण्यः सर्वलोकप्रियङ्करः॥ **17** ॥

सर्वलोकैकशरणः सर्वलोकेष्टदायकः।
एवं स्वाभीष्टदैः श्लोकैः स्तुतः श्रीशो ददाति शम्॥ **18** ॥

नमोऽस्त्वाचार्यपादाभ्यां महालक्ष्म्यै नमो नमः।
प्रणमामि प्रणौमि त्वां महाविष्णो ! प्रसीद मे॥ **19** ॥

॥ इति श्रीनिवासाष्टोत्तरशतनामस्तुतिः समाप्ता ॥